M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref. / Ser. 282

Title: Shrinakavacha Sahasrakumbha Mantra

282

शिवकवच सहस्र वर्णोक्त मन्त्र/

Incomplete

Shiva [kavacha] Sahasra Varnokta Mantra	Title
	Author
	Editor
	Year, Vols.
	Publisher
282 Ends abruptly	Remarks

श्रीगणेशायनमः॥ आचम्यप्राणानायम्यदेशकालौसंकीर्त्यममनिखिलदौर्भाग्यदुःस्वप्नदुर्निमित्तग्रहभू
तपिशाचब्रह्मराक्षसवेतालशाकिनीडाकिनीपिशाचादिविविधपीडानिरासार्थं एकादशदिनपर्यंतं प्रत्य
हं अघोत्तरशतावृत्त्याश्रीसांबसदाशिवप्रीतये शिवकवचसहस्रवर्णात्मकमंत्रजपं शिवपंचाक्षरेणसंपु
तमंत्रजपमहंकरिष्ये· तत्रआसनादिकरिष्ये· अस्यश्रीशिवकवचमंत्रस्य· ऋषभऋषिः शिरसि·
अनुष्टुप्छंदसे·मुखे· सदाशिवदेवतायै·हृदि· ह्रांबीजं· ह्रींशक्तिः ह्रूंकीलकं· अमुककामनासि
ध्यर्थेजपेवि॰ ॐह्रांसदाशिवाय॰अंगुष्ठा॰ ॐह्रींगंगाधरायतर्जनी॰ ॐह्रूंमृत्युंजयाय॰मध्यमा॰
ॐह्रैंईश्वरपाणये॰ अनामि॰ ॐह्रौंअंबिकापतये॰कनि॰ॐ ह्रःउमापतयेकरतल॰ एवंहृदयादि॰
अथध्यानं उग्रदंष्ट्रंत्रिनयनंकालकंठमरिंदमं सहस्रनयनोपेतंवंदेशंभुमुमापतिं॰ १ ध्याये
न्नीलकंठंमहेशंरजतगिरिनिभं॰ २॥ अथसहस्राक्षरोमंत्रः॥ ॐनमोभगवतेसदाशिवायस
कलतत्त्वात्मकायसर्वमंत्रस्वरूपायसर्वयंत्राधिष्ठितायसर्वतंत्रस्वरूपायसर्वतत्त्वविदूरायब्रह्म
रुद्रावतारिणेनीलकंठायपार्वतीमनोहरप्रियायसोमसूर्याग्निलोचनायभस्मोद्धूलितविग्रहा

शिव० मंत्र० यमहामणिमुकुटधारिणेमाणिक्यभूषणायसृष्टिस्थितिप्रलयात्मकायगौरीवल्लभायदक्षाध्वरविध्वंस
कायमहाकालभेदनायमूलाधारैकनिलयायतत्वातीतायगंगाधरायसर्वदेवादिदेवायषडाश्रयायवेदांत
साराय त्रिवर्गसाधनायानेककोटिब्रह्मांडनायकायअनंतवासुकितक्षककर्कोटकशंखकुलिकपद्ममहापद्मेत्य
२ ष्टनागकुलभूषणायप्रणवस्वरूपायचिदाकाशायाकाशदिक्स्वरूपायग्रहनक्षत्रमालिनेसकलायकलं
करहितायसकललोकैककर्त्रेसकललोकैकभर्त्रेसकललोकैकसंहर्त्रेसकललोकैकगुरवेसकललोकैकसा
क्षिणेसकलनिगमगुह्यायसकलवेदांतपारगायसकललोकैकवरप्रदायसकललोकैकशंकरायशशां
कशेखरायशाश्वतनिजावासायनिराभासायनिरामयायनिर्मलायनिर्लोभायनिर्मदायनिश्चिं
तायनिरहंकारायनिराकुलायनिष्कलंकायनिर्गुणायनिष्कामायनिरुपप्लवायनिरव[illegible]धायनि
रंतकायनिष्कारणायनिरातंकायनिष्प्रपंचायनिःसंगायनिर्द्वंद्वायनिराधारायनिरोगायनिष्क्रो
धायनिर्ममायनिष्पापायनिर्भयायनिर्विकल्पायनिर्भेदायनिष्क्रियायनिस्तुलायनिःसंशाय
निरंजनायनिरुपमविभवायनित्यशुद्धबुद्धपरिपूर्णसच्चिदानंदाद्वयायपरमशांतस्वरूपायतेजो २
मयायजयजयमहारुद्रमहारौद्रभद्रावतारमहाभैरवकालभैरवकल्पांतभैरवकपालमालाधरख

ट्वांगखड्गचर्मपाशांकुशडमरुकत्रिशूलचापबाणगदाशक्तिभिंडिमालातोमरमुसलमुद्गरप्रास
परशुपट्टिशपरिघभुशुंडीशतघ्नीचक्राद्यायुधभीषणकरसहस्रमुखदंष्ट्राकरालवदनविकटाट्ट
हासविस्फारितब्रह्मांडमंडलनागेंद्रकुंडलनागेंद्रहारनागेंद्रवलयनागेंद्रचर्मधरमृत्युंजय
त्र्यंबकत्रिपुरांतकविश्वरूपविरूपाक्षविश्वेश्वरवृषभवाहनविश्वतोमुखसर्वतोरक्षसर्वतोरक्ष
मांज्वल २ महामृत्युमपमृत्युभयंनाशय २ चोरभयमुत्सादयोत्सादय विषसर्पभयंशमय २ चो
रान्मारय २ ममशत्रूनुच्चाटयोच्चाटय त्रिशूलेनविदारय २ कुठारेणभिंधि २ खड्गेनच्छिंधि २ खट्वांगे
नविपोथय २ मुसलेननिष्पेषय २ बाणैःसंताडय २ रक्षांसिभीषयभीषयाशेषभूतानिविद्रावय २
कूश्मांडवेतालमारीचब्रह्मराक्षसगणान्संत्रासय २ ममाभयंकुरु २ वित्रस्तंमामाश्वासयाश्वा
सय नरकभयान्मामुद्धरोद्धर संजीवय २ क्षुत्तृड्भ्यामाप्यायाप्यायय दुःखातुरंमामानंदयाा
नंदय शिवकवचेनमामाच्छादयाच्छादय मृत्युंजय त्र्यंबक सदाशिव नमस्तेनमस्ते ॥ इत्ये
तत्कवचंशार्वमित्यादियोगीश्वरगतिर्यावद्दृत्यंतंपठेत् ॥ तत्रकालः कार्तिकमार्गशीर्षमासो
इतिमाहात्म्यंतत्फलश्रुतिंसकृत्पठित्वा सकृद्भूतिमभिमंत्र्यशिवदेवतायगुर्वतिसमर्पयेत् तेनश्री

घेरशाखमंज्ञके• श्रातणेबङ्कुलेपक्षेजपस्यारंमणंकुरु• २ इत्युक्तंपल्लुशितेन॥ इतिसहस्राक्षरीशि
वकवचमहामंत्रःसमाप्तः॥ ॥ अथनृसिंहमंत्रविधानं॥ अस्यैकाक्षरनृसिंहमंत्रस्य• अत्रिर्ऋषिः
गायत्रीछंदः। नृकेसरीदेवता• षड्दीर्घैःषडंगानि• ध्यानं• तपनसोमहुताशनलोचनंघनसमानग
 ळंशशिसप्रभं• अभयचक्रपिनाकवरान्करैर्दधतमिंदुधरंनृहरिंभजे• १• [illegible] गंधादिमानसो
पचारैःसंपूज्य• गुह्यातिजलंसमर्पयेत्• लक्षंजपः घृतपायसैर्होमः दूर्वात्रयेणाष्टसहस्रैः ज्वरेहोमः
महोत्पातादुपद्रवान्नश्यंति• विधिवत्कुंभंसंस्थाप्याष्टसहस्रंजपः विषाक्रांतविषजार्तिं निकृंतये
भिषेकः अरण्येचोरव्याघ्रसर्पाकुलेजपन्नैवभयं• इष्टस्वप्नेजपन्निशांनयेत्• स्वप्नफलंप्रदि
शति• कर्णनेत्रशिरःकंठरोगान्मंत्रोविनाशयेत्• मंत्रितभस्मना आभिचारकृतांपीडां आत्मानंनृ
हरिंध्यायन्वैरिणांमृगबालकंमत्वायस्यांतस्यांदिशिउत्सृजेत्• स्वकुटुंबंपरित्यज्यनचैवागतैः वा
देनृसिंहंस्मरन्रिपुविनष्टिः। मारणंश्वपापनष्टये१००००जपः बिल्ववृक्षपुष्पफलैस्तत्काष्ठवर्धितै
सहस्रंहोमाद्वांछितश्रीप्राप्तिः पुत्रजीवतरुकाष्ठैर्दीमेतत्फलैर्होमात्पुत्रप्राप्तिः ब्राह्मीवचावाभिमंत्रे
णमंत्रितांशतसंख्यया• संवत्सरमदनप्रातर्विद्यापारगतोभवेत्• इतिमंत्रमहोदधौ• ॐ क्ष्रौं• मनुः